# चतुर्थोल्लासः

यद्यपि शब्दार्थयोर्निर्णये कृते दोषगुणालङ्काराणां स्वरूपमभिधानीयं, तथापि धर्मिणि प्रदर्शिते धर्माणां हेयोपादेयता ज्ञायत इति प्रथमं काव्यभेदाताह-

**अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद्ध्वनौ ।**
**अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम् ॥ २४ ॥**

लक्षणामूलगूढव्यङ्ग्यप्राधान्ये सत्येव अविवक्षितं वाच्यं यत्र सः **ध्वनौ** इत्यनुवादाद् ध्वनिरिति ज्ञेयः । तत्र च वाच्यं क्वचिदनुपयुज्यमानत्वादर्थान्तरे परिणमितम् ।

यथा-

**त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।**
**आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ॥२३॥**

अत्र वचनादि उपदेशादिरूपतया परिणमति ।

क्वचिदनुपपद्यमानतया अत्यन्तं तिरस्कृतम् । यथा-

**उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।**
**विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम् ॥२४॥**

एतदपकारिणं प्रति विपरीतलक्षणया कश्चिद्वक्ति ॥२४॥

**विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः ।**

अन्यपरं व्यङ्ग्यनिष्ठम् । एष च

**कोऽप्यलक्ष्यक्रमव्यङ्ग्यो लक्ष्यव्यङ्ग्यक्रमः परः ॥ २५ ॥**

अलक्ष्येति । न खलु विभावानुभावव्यभिचारिण एव रसः । अपि तु रसस्तैः इत्यस्ति क्रमः । स तु लाघवान्न लक्ष्यते ॥२५॥

तत्र-

## अलक्ष्यक्रमव्यङ्ग्यध्वनिनिरूपणम्

**रसभावतदाभावभावशान्त्यादिरक्रमः ।**
**भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः ॥ २६ ॥**

आदिग्रहणाद्भावोदयभावसंधिभावशबलत्वानि । प्रधानतया यत्र स्थितो रसादिस्तत्रालङ्कार्यः यथोदाहरिष्यते ।

1. रस
2. भाव
3. रसाभास
4. भावाभास
5. भावोदय
6. भावशान्ति
7. भावसन्धि
8. भावशबलता

अन्यत्र तु प्रधाने वाक्यार्थे यत्राङ्गभूतो रसादिस्तत्र गुणीभूतव्यङ्ग्ये
रसवत्प्रेयऊर्जस्विसमाहितादयोऽलङ्काराः ।
ते च गुणीभूतव्यङ्ग्याभिधाने उदाहरिष्यन्ते ॥२६॥

रसभावतदाभावभावशान्त्यादिरक्रमः ।
भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः ॥ २६ ॥

तत्र रसस्वरूपमाह-

कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः ॥ २७ ॥

विभावा अनुभावास्तत्कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ॥ २८ ॥

# रसध्वनिरूपणं रसस्वरूपविचारश्च

उक्तं हि भरतेन-

**विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः इति**

| | |
|---|---|
| विभावः | आलम्बनम् (नायकादिः) उद्दीपनञ्च(चन्द्रिकायः) |
| अनुभावः | कटाक्षभुजाक्षेपप्रभृतभिः |
| व्यभिचारिभावः | निर्वेदादयः 33 |
| स्थायिभावाः | रत्यादयः 9 |

प्रभृतिपदात्-

स्तम्भः स्वेदोऽथ स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विकाः स्मृतः।।

# रत्यादिभावानां विभावादिना सह संयोगः (सम्बन्धः)

| विभावः | उत्पाद्योत्पादकभावः (सम्बन्धः) | रत्यादयः |
|---|---|---|
| अनुभावः | गम्यगमकभावः (सम्बन्धः) | रत्यादयः |
| व्यभिचारिभावः | पोष्यपोषकभावः (सम्बन्धः) | रत्यादयः |

## भट्टलोल्लटस्य रसोत्पत्तिवादः

(रसनिष्पत्तिः = रसोत्पत्तिः)

एतद्विवृण्वते-

विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः कृतः व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपसंधानान्नर्तकेऽपि प्रतीयमानो रसः इति भट्टलोल्लटप्रभृतयः ।

## श्रीशङ्कुकस्य रसानुमितिवादः

(रसनिष्पत्तिः = रसानुमितिः)

राम एवायमयमेव राम इति न रामोऽयम् इत्यौत्तरकालिके बाधे रामोऽयमिति रामः स्याद्वा न वायमिति रामसदृश्योऽयमिति च सम्यङ्गिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगादिन्यायेन रामोऽयमिति प्रतिपत्त्या ग्राह्ये नटे-

**(सम्भोगशृङ्गाररूपस्य काव्यस्य उदाहरणम्)**

**सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः ।**
**मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता ॥२५॥**

**(विप्रलम्भरूपस्य काव्यस्य उदाहरणम्)**

**दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च ।**
**अचिरलविलोलजलदः कालः समुपागतश्चायम् ॥२६॥**

# भेदचतुष्टयात्मिका प्रतीतिः

(प्रतीतिः ज्ञानम्)

| | |
|---|---|
| 1.सम्यक्प्रतीतिः | राम एवायमयमेव राम इति |
| 2.मिथ्याप्रतीतिः | न रामोऽयम् इत्यौत्तरकालिके बाधे रामोऽयमिति |
| 3.सशंयप्रतीतिः | रामः स्याद्वा न वायमिति |
| 4.सादृश्यप्रतीतिः | रामसदृश्योऽयमिति |

एतेभ्यः ज्ञानेभ्यः विलक्षणं ज्ञानं चित्रतुरगादिन्यायरूपम्



इत्यादिकाव्यानुसंधानबलाच्छिक्षाभ्यासनिर्वर्तितस्वकार्यप्रकटनेन च नटेनैव प्रकाशितैः कारणकार्यसहकारिभिः कृत्रिमैरपि
तथा अनभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः संयोगात् गम्यगमकभावरूपात् अनुमीयमानोऽपि वस्तुसौदर्यबलाद् रसनीयत्वेन अन्यानुमीयमानविलक्षणः स्थायित्वेन संभाव्यमानो रत्यादिर्भावस्तत्र असन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशङ्कुकः ।

# अनुमितिस्वरूपम्

## पर्वतो बह्निमान् धूमात् महानसवत् (महानस = रसोईघर)

| | |
|---|---|
| 1.पक्ष | पर्वत |
| 2.साध्य | बह्नि (अग्नि) |
| 3.हेतु | धूम |
| 4उदाहरण | रसोईघर |
| 5.व्याप्ति | जहां जहां धुंआ वहां वहां अग्नि (साहचर्यनयम) |
| 6.व्याप्य | धुंआ (न्यूनदेश में रहने बाला) |
| 7.व्यापक | अग्नि (अधिकदेश में रहने बाला) |
| 8.अनुमिति | पर्वत अग्निवाला है |

# रसानुमितिः

इयं सीता रामविषयकरतिमती तद्विषयकविलक्षणकटाक्षादिमत्वात्

| पक्ष | राम |
| --- | --- |
| साध्य | रामविषयकरतित्व |
| हेतु | सीताविषयकविलक्षणकटाक्षादिमत्व |
| उदाहरण | दुष्यन्तादि |
| व्याप्तिः | यन्नैवं तन्नैवं यथा अहम् |
| व्याप्य | सीताविषयकविलक्षणरतित्व |
| व्यापक | राम |
| अनुमिति | रामः सीताविषयकरतिमान् |

# भट्टनायक रसभुक्तिवाद
(रसनिष्पत्ति = रसभुक्ति)

न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते नोत्पद्यते नाभिव्यज्यते अपि तु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यते इति भट्टनायकः

**सत्त्वोद्रेकात्** सत्त्वनामकः गुणः सांख्यदर्शने प्रसिद्धगुणत्रयेषु (सत्वरजतमोगुणेषु) अन्यतमः  गुणः) तस्य उद्रेकः रजस्तमसी, अभिभूय यः प्रकाशः स एव आनन्दस्वरूपः संवित् ज्ञानम्, तस्य **विश्रान्तिः** = ज्ञयान्तरसंपर्कशून्यत्वम्। **तत्सतत्वेन** = तत्स्वरूपेण **भोगेन** = भोजकत्वव्यापारेण

# अभिनवगुप्तपादस्य अभिव्यक्तिवादः

(रसनिष्पत्ति = रसाभिव्यक्ति)

लोके प्रमदाभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्त्वादलौकिकविभावादिशब्दव्यवहार्यैर्ममैवैते
शत्रोरेवैते तटस्थस्यैवैते न ममैवैते
न शत्रोरेवैते न तटस्थस्यैवैते इति संबन्धविशेषस्वीकारपरिहारनियमानध्यवसायात्साधारण्येन प्रतीतैरभिव्यक्तः

सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि
साधारणोपायबलात् तत्काल-विगलितपरिमितप्रमातृभाववशोन्मिषितवेद्यान्तरसंपर्कशून्यापरिमितभावेन
प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि
गोचरीकृतश्चर्व्यमाणतैकप्राणोविभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन्
हृदयमिव प्रविशन् सर्वाङ्गीणमिवालिङ्गन् अन्यत्
सर्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको रसः ।

# रसस्य अलौकिकत्वसिद्धिः

स च न कार्यः । विभावादिविनाशेऽपि तस्य संभवप्रसङ्गात् । नापि ज्ञाप्यः सिद्धस्य तस्य असम्भवात् अपि तु विभावादिभिर्व्यञ्जितश्चर्वणीयः । कारकज्ञापकाभ्याम् अन्यत् क्व दृष्टमिति चेत्, न क्वचिद् दृष्टमित्यलौकिकसिद्धेर्भूषणमेतन्न दूषणम् ।

चर्वणानिष्पत्त्या तस्य निष्पत्तिरुपचरितेति कार्योऽप्युच्यताम् ।

लौकिकप्रत्यक्षादिप्रमाणताटस्थ्य-अवबोधशालिमितयोगिज्ञान-वेद्यान्तरसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदन-विलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्येयोऽप्यभिधीयताम् ।

| | |
|---|---|
| 1.लौकिकप्रत्यक्षम् | इन्द्रियार्थसन्निकर्षजन्यं ज्ञानम् |
| 2.युञ्जानयोगिप्रत्यक्ष (अपक्वयोगिप्रत्यक्षम्) | चक्षुरादिलौकिकप्रमाणरहितं ज्ञानम् |
| 3.युक्तयोगिप्रत्यक्ष (पक्वयोगिप्रत्यक्षम्) | लौकिकविषयस्य सम्बन्धेन रहितं स्वस्वरूपात्ममात्रविषयकं ज्ञानम् |

**रसानुभूतिरूपं ज्ञानम् एतेभ्यः ज्ञानेभ्यः विलक्षणं ज्ञानं भवति**

| | |
|---|---|
| **विलक्षणलोकोत्तरस्वसंवेदनगोचरः** | **अलौकिकविभावादिमत्वं ज्ञानम्** |

## पुनः युक्त्यन्तरेण रसस्य अलौकिकत्वं सिद्ध्यति

तद्ग्राहकं च न निर्विकल्पकं विभावादिपरामर्शप्रधानत्वात् । नापि सविकल्पकं चर्व्यमाणस्यालौकिकानन्दमयस्य स्वसंवेदनसिद्धत्वात् । उभयाभावस्वरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधमिति श्रीमदाचार्याभिनवगुप्तपादाः ॥

## विभावादिसाहित्ये रसाभिव्यक्तिः

व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौद्राणामश्रुपातादयोऽनुभावाः शृङ्गारस्येव करुणभयानकयोः चिन्तादयो व्यभिचारिणः शृङ्गारस्यएव वीरकरुणभयानकानामिति पृथगनैकान्तिकत्वात्सूत्रे मिलिता निर्दिष्टाः ।

| रस | श्रृङ्गार | हास्य | करुण | रौद्र | वीर | भयानक | वीभत्स | अद्भुत् | शान्त |
|---|---|---|---|---|---|---|---|---|---|
| विभाव | .... | .... | .... | व्याघ्र | व्याघ्र | व्याघ्र | .... | .... | .... |
| अनुभाव | अश्रुपातादि | | अश्रुपातादि | | | अश्रुपातादि | .... | .... | .... |
| व्यभिचारिभाव | चिन्ता | .... | चिन्ता | .... | .... | चिन्ता | .... | .... | .... |

## पृथक् पृथक् विभावादेः वर्णनेन रसाभिव्यक्ति
## (विभाववर्णनम्)

वियदलिमलिनाम्बुगर्भमेघं
मधुकरकोकिलकूजितैर्दिशां श्रीः ।
धरणिरभिनवाङ्कुराङ्कटङ्का
प्रणतिपरे दयिते प्रसीद मुग्धे ॥२७ ॥

इत्यादौ-

## अनुभाववर्णनम्

परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः
कथमपि परिवारप्रार्थनाभिः क्रियासु ।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मीं
अभिनवकरिदन्तच्छेदकान्तः कपोलः ॥२८॥

इत्यादौ

## व्यभिचारिवर्णनम्

दुरादुत्सुकमागते विवलितं संभाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने किञ्चाञ्चितभ्रूलतम् ।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णेक्षणं
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥२९॥

इत्यादौ च

यद्यपि विभावानामनुभावानामौत्सुक्यव्रीडाहर्षकोपासूयाप्रसादानां च व्यभिचारिणां केवलानामत्र स्थितिः, तथाप्येतेषामसाधारणत्वमित्यन्यतमद्वयाक्षेपकत्वे सति नानैकान्तिकत्वमिति ॥२८॥

## रसभेद निरूपण

तद्विशेषानाह-

**शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानकाः ।**
**बीभत्साद्भुतसञ्ज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥ २९ ॥**

तत्र शृङ्गारस्य द्वौ भेदौ सम्भोगो विप्रलम्भश्च तत्राद्यः परस्पर-अवलोकन-आलिङ्गन-अधरपान-परिचुम्बनादि-अनन्तत्वाद्-अपरिच्छेद्य एक एव गण्यते ।

## सम्भोगः श्रृङ्गाररसः

यथा-

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विश्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥३० ॥

तथा-

त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि ।
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ॥३१ ॥

## विप्रलम्भो श्रृङ्गाररस

अपरस्तु  अभिलाष-विरह-ईर्ष्या-प्रवास-शापहेतुक इति पञ्चविधः । क्रमेणोदाहरणम्

## अभिलाषनिमित्तको विप्रलम्भश्रृङ्गाररसः

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदयाः
तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ।
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणात्
आशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः ॥३२ ॥

## विरहनिमित्तको विप्रलम्भश्रृङ्गाररसः

**अन्यत्र व्रजतीति का खलु कथा नाप्यस्य तादृक्सुहृद्**
**यो मां नेच्छति नागतश्च हहहा कोऽयं विधेःप्रक्रमः ।**
**इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे**
**बाला वृत्तविवर्तनव्यतिकरा नाप्नोति निद्रां निशि ॥३३ ॥**

एषा विरहोत्कण्ठिता ।

## ईर्ष्याहेतुको विप्रलम्भश्रृङ्गाररसः

सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ॥३४॥

## प्रवासहेतुको विप्रलम्भश्शृङ्गाररसः

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवित प्रियसुहृत्सार्थः किमु त्यज्यते ॥३५॥

## शापहेतुको विप्रलम्भश्रृङ्गाररसः

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ॥३६ ॥

## हास्यरस

### विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत् ।

आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्या
मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे ।
तारस्वरं प्रथितथूत्कमदात्प्रहारं
हाहा हतोऽहमिति रोदिति विष्णुशर्मा ॥३७ ॥

## करुणरस

इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत्।

हा मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वाशिषः
धिक्प्राणान् पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ ।
इत्थं घर्घरमध्यरुद्धकरुणाः पौराङ्गनानां गिर
श्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि ॥३८॥

## रौद्ररस

**रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः ।**

(वीर-रस से भेद)

**रक्तास्यनेत्रता चात्र भेदिनी युद्धवीरतः ।**

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥३९॥

# वीररस

## उत्तमप्रकृतिवीर उत्साहस्थायिभावकः

क्षुद्रा संत्रासमेते विजहित हरयः क्षुण्णशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः ।
सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥४० ॥

## भयानकरस

भयानको भयस्थायिभावो काऽधिदैवतः ।

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥४१ ॥

# बीभत्सरस

**जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते रसः**

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसा
न्यंसस्फिक्पृष्ठपिण्डयाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।
आर्त्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥४२ ॥

# अद्भुतरस

अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः ।

चित्रं महानेष बतावतारः क्व कान्तिरेषाभिनवैव भङ्गिः ।
लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः ॥४३ ॥

एषां स्थायिभावानाह-

**रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।**
**जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥ ३० ॥**

स्पष्टम् ॥३० ॥

# स्थायिभाव

| | |
|---|---|
| रति | मन के अनुकूल पदार्थ में मन की तत्परता को रति कहते हैं। |
| हास | वचन आदि के विकारों से चित्त के विकास को हास कहते हैं। |
| शोक | इष्टनाश आदि से चित्त की विह्वलता को हास कहते हैं। |
| क्रोध | शत्रु आदि प्रतिकूल पदार्थों में प्रतिकार की इच्छा को होने को क्रोध कहते हैं। |
| उत्साह | कार्य के आरम्भ में अत्यन्त स्थिर आवेश को उत्साह कहते हैं। |
| भय | रौद्र शक्ति से उत्पन्न चित्त की विह्वलता से उत्पन्न भाव भय होता है। |
| जुगुप्सा | दोष के दर्शन आदि से विषय में होने वाली घृणा जुगुप्सा कहलाती है। |
| विस्मय | लोक की सीमा को अतिक्रान्त अनेकों पदार्थों में चित्त का विस्तार विस्मय कहलाता है। |

व्यभिचारिणो ब्रूते-

निर्वेदग्लानिशङ्काख्यास्तथासूया मदश्रमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥ ३१ ॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥ ३२ ॥
सुप्तं प्रबोधोमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ ३३ ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंस्त्रिशदमी भावाः समाख्यातास्तु नामतः ॥ ३४ ॥

# व्यभिचारिभाव

1.निर्वेद
2.ग्लानि
3.शङ्का
4.असूया
5.मद
6.श्रम
7. आलस्य
8.दैन्य
9.चिन्ता
10. मोह
11.स्मृति
12.धृति
13.व्रीडा
14.चपलता
15.हर्ष
16.आवेग
17जडता
18.गर्व
19.विषाद
20.आत्सुक्य
21.निद्रा
22.अपस्मार
23.सुप्त
24.प्रबोध
25.अमर्ष
26.अवहित्थ
27.उग्रता
28.मति
29.व्याधि
30.उन्माद
31मरण
32.त्रास
33.वितर्क

निर्वेदस्यामङ्गलप्रायस्य प्रथममनुपादेयत्वेऽप्युपादानं व्यभिचारित्वेऽपि स्थायिताभिधानार्थम्। तेन-

निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः ।

यथा-

**अहौ वा हारे वा कुसुमशयने वा दृषदि वा**
**मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा ।**
**तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः**
**क्वचित्पुण्यारण्ये शिव शिव शिवेति प्रलपतः ॥४४॥**

# भावः

रतिर्देवादिविषया व्यभिचारी तथाञ्जितः ॥ ३५ ॥

**भावः प्रोक्तः**

आदिशब्दान्मुनिगुरुनृपपुत्रादिविषया । कान्ताविषया तु व्यक्ता शृङ्गारः ।

उदाहरणम्-

कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतम् ।
अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते ॥४५॥

हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥४६॥

एवमन्यदप्युदाहार्यम् ।

| रस | स्थायिभाव |
|---|---|
| श्रृङ्गार | रति |
| हास्य | हास |
| करुण | शोक |
| रौद्र | क्रोध |
| वीर | उत्साह |
| भयानक | भय |
| बीभत्स | जुगुप्सा |
| अद्भुत | विस्मय |
| शान्त | निर्वेद |

एवमन्यदप्युदाहार्यम् । अङ्गितव्यभिचारी यथा-

**जाने कोपपराङ्मुखी प्रियतमा स्वप्नेद्य दृष्टा मया,**
**मा मां संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः ।**
**नो यावत्परिरभ्य चाटुशतकैराश्वासयामि प्रियां**
**भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः ॥४७ ॥**

अत्र विधिं प्रत्यसूया ।

## रसाभासध्वनिः भावाभासध्वनिश्च

### .........तदाभासा अनौचित्यप्रवर्त्तिताः ।

तदाभासा रसाभासा भावाभासाश्च । तत्र रसाभासो यथा-

**स्तुमः कं वामाक्षि क्षणमपि विना यं न रमसे**
**विलेभे कः प्राणान् रणमखमुखे यं मृगयसे ।**
**सुलग्ने को जातः शशिमुखि यमालिङ्गसि बलात्**
**तपःश्रीः कस्यैषा मदननगरि ध्यायसि तु यम् ॥४८॥**

अत्रानेककामुकविषयमभिलापं तस्याः स्तुम इत्याद्यनुगतं बहुव्यापारोपादानं व्यनक्ति ।

भावाभासो यथा-

**राकासुधाकरमुखी तरलायताक्षी**
**सा स्मेरयौवनतरङ्गितविभ्रमाङ्गी ।**
**तत्किं करोमि विदधे कथमत्र मैत्रीं**
**तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः ॥४९॥**

अत्र चिन्ता अनौचित्यप्रवर्तिता । एवमन्येऽप्युदाहार्याः ॥

## भावशान्तिः भावोदयः भावसन्धिः भावशबलता च

**भावस्य शान्तिरुदयः सन्धिः शबलता तथा ॥ ३६ ॥**

क्रमेणोदाहरणम्-

### भावशान्तिध्वनिः

तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते ।
इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया
साश्लिष्टा रभसेन तत्सुखवशात्तन्व्या च तद्विस्मृतम् ॥५० ॥

अत्र कोपस्य ।

## भावोदयध्वनिः

एकस्मिञ्शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यो मानपरिग्रहग्लपितया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणं
मा भूत्सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥५१ ॥

अत्रौत्सुक्यस्य ।

## भावसन्धिध्वनिः

उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः
सत्संगप्रियता च वीररभसोत्फालश्च मां कर्षतः ।
वैदेहीपरिरम्भ एष च मुहुश्चैतन्यमामीलयन्
आनन्दी हरिचन्दनेन्दुशिशिरस्निग्धो रुणद्ध्यन्यतः ॥५२॥

अत्रावेगहर्षयोः ।

# भावशबलताध्वनिः

क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा
दोषाणां प्रशमाय न श्रुतमहो कोपेऽपि कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति ॥५३ ॥

अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शबलता ।
भावस्थितिस्तूक्ता उदाहृता च ॥३६ ॥

**रसध्वनिकाव्यात् भावध्वनिकाव्यस्य पार्थक्यं च तदास्वादेऽपि भावशान्त्यादीनाम् अनुभूतिः**

**मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन ।**

ते भावशान्त्यादयः । अङ्गित्वं राजानुगतविवाहप्रवृत्तभृत्यवत् ॥


**(संलक्ष्यक्रमव्यङ्ग्य-ध्वनिकाव्यस्य निरूपणम्)**

**अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः ॥ ३७ ॥**

## (संलक्ष्यक्रमव्यङ्ग्यध्वनेः भेदत्रयम्)

**शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः ।**

शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यः, अर्थशक्तिमूलानुरणनरूपव्यङ्ग्यः,
उभयशक्तिमूलानुरणनरूपव्यङ्ग्यश्चेति त्रिविधः ॥३७ ॥




**संलक्ष्यक्रमव्यङ्ग्यध्वनेः त्रयः भेदाः**

## (शब्दशक्त्युद्भवध्वनेः भेदद्वयम्)

तत्र

**अलङ्कारोऽथ वस्त्वेव शब्दाद्यत्रावभासते ॥ ३८ ॥**
**प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा ।**

वस्त्वेति, अनलङ्कारं वस्तुमात्रम् । आद्यो यथा-

**उल्लास्य कालकरवालमहाम्बुवाहं**
**देवेन येन जरठोर्जितगर्जितेन ।**
**निर्वापितः सकल एव रणे रिपूणां**
**धाराजलैस्त्रिजगति ज्वलितः प्रतापः ॥५४॥**

अत्र वाक्यस्यासंबद्धार्थाभिधायकत्वं मा प्रसाङ्क्षीदिति प्राकरणिकाप्राकरणिकयोरुपमानोपमेयभावः कल्पनीय इत्यत्रोपमालङ्कारो व्यङ्ग्यः ।

तिग्मरुचिरप्रतापो विधुरनिशाकृद्विभो मधुरलीलः ।
मतिमानतत्त्ववृत्तिःप्रतिपदपक्षाग्रणीर्विभाति भवान् ॥५५॥

अत्रैकैकस्य पदस्य द्विपदत्वे विरोधाभासः ।

एकपदस्य द्वित्वे कृते सति विरोधाभासो ध्वन्यते

तिग्मरुचिः + अप्रतापः, विधुः + अनिशाकृद्त्  मधुः + अलीलः, मतिमान् + अतत्त्ववृत्तिः, प्रतिपद् + अपक्षाग्रणीः ।

अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो ।
अहितः सहितः साधुयशोभिरसतामसि ॥५६॥

अत्रापि विरोधाभासः ।

**व्यतिरेकालङ्कारध्वनिः**

निरुपादानसंभारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कलाश्लाध्याय शूलिने ॥५७॥

अत्र व्यतिरेकः ।

# व्यतिरेक-अलङ्कारध्वनेः उदाहरणम्

निरुपादानसंभारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कलाश्लाध्याय शूलिने ॥५७ ॥

अत्र व्यतिरेकः ।
अलङ्कार्यस्यापि ब्राह्मणश्रमणन्यायेनालङ्कारता ।

व्यतिरेकलक्षणम्- आधिक्यम् उपमेयस्योपमानान्न्यूनताऽथवा । (साहित्यदर्पण) 10.52
व्यतिरेकः

वस्तुमात्रं यथा-

**पथिक नात्र स्त्रस्तरमस्ति मनाक्प्रस्तरस्थले ग्रामे ।**
**उन्नतपयोधरं प्रेक्ष्य यदि वससि तदा वस ॥**

अत्र यद्युपभोगक्षमोसि तदा आस्स्वेतिं व्यज्यते ।

**शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम् ।**
**यत्र प्रसीदसि पुनः स भात्युदारोनुदारश्च ॥५९॥**

अविरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुत इति ध्वन्यते ।

# अर्थशक्त्युद्भवध्वनिनिरूपणम्

अर्थशक्त्युद्भवोऽप्यर्थो व्यञ्जकः संभवी स्वतः ॥ ३९ ॥
प्रौढोक्तिमात्रात्सिद्धो वा कवेस्तेनोम्भितस्य वा ।
वस्तु वालङ्कृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत् ॥ ४० ॥
वस्त्वलङ्कारमथवा तेनायं द्वादशात्मकः ।

स्वतःसंभवी न केवलं भणितमात्रनिष्पन्नो यावद्बहिरप्यौचित्येन संभाव्यमानः । कविना प्रतिभामात्रेण बहिरसन्नपि निर्मितः कविनिबद्धेन वक्रेति वा द्विविधोपर इति त्रिविधः । वस्तु वालङ्कारो वासाविति षोढा व्यञ्जकः । तस्य वस्तु वालङ्कारो वा व्यङ्ग्य इति द्वादशभेदोऽर्थशक्त्युद्भवो ध्वनिः ।

# अर्थशक्त्युद्भवध्वनि के बारह भेद

| | |
|---|---|
| 1. | स्वतः सम्भवी वस्तु व्यञ्जक वस्तुध्वनि |
| 2. | स्वतः सम्भवी वस्तु व्यञ्जक अलङ्कारध्वनि |
| 3. | स्वतः सम्भवी अलङ्कार व्यञ्जक वस्तुध्वनि |
| 4. | स्वतः सम्भवी अलङ्कार व्यञ्जक अलङ्कारध्वनि |
| 5. | कविप्रौढोक्तिसिद्ध वस्तु व्यञ्जक वस्तुध्वनि |
| 6. | कविप्रौढोक्ति वस्तु व्यञ्जक अलङ्कारध्वनि |
| 7. | कविप्रौढोक्ति अलङ्कार व्यञ्जक वस्तुध्वनि |
| 8. | कविप्रौढोक्ति अलङ्कार व्यञ्जक अलङ्कारध्वनि |
| 9. | कविनिबद्ध वक्तृप्रौढोक्तिसिद्ध वस्तु व्यञ्जक वस्तुध्वनि |
| 10. | कविनिबद्ध वक्तृप्रौढोक्तिसिद्ध वस्तु व्यञ्जक अलङ्कारध्वनि |
| 11. | कविनिबद्ध वक्तृप्रौढोक्तिसिद्ध अलङ्कार व्यञ्जक वस्तुध्वनि |
| 12. | कविनिबद्ध वक्तृप्रौढोक्तिसिद्ध अलङ्कार व्यञ्जक अलङ्कारध्वनि |